**दिनाङ्क :- 11.04.2026**

**प्रात: - 06:55**

## अथ वार्ता:

### पश्चिम-एशियादेशे – युद्धविरामः

पश्चिम-एशियादेशे सप्ताहद्वयोः युद्धविरामस्य अनन्तरम् अपि लेबनान्-देशे इस्राएल्-देशस्य निरन्तर-आक्रमणे मृतानां नागरिकानां वर्धमानस्य सङ्ख्यायाः विषये भारतेन गभीरं दुःखं प्रकटितम्। नागरिकानां रक्षणं तस्य सर्वोच्चप्राथमिकता अस्ति इति भारतेन दृढीकृतम्। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः नवदिल्ल्यां पश्चिम-एशियायाः वर्तमान-घटनाक्रमस्य विषये अन्तर्मन्त्रालयीयं विवरणं सम्बोधयन् अवदत् यत् वर्तमानस्थितिः अतीव चिन्तास्पदमस्ति। एतदतिरिच्य, प्रशासनेन उक्तं यत् पश्चिम-एशिया-सङ्कटकाले देशस्य विद्युदुत्पादनस्य, ऊर्जायाः च आवश्यकता: सफलतया पूर्यते। पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्तसचिवः सुजाता शर्मा इत्येषा अवदत् यत्, देशे आन्तरिक-एल्. पी. जी. इत्यस्य, इन्धनस्य च आपूर्तिः स्थिरा अस्ति।

### इरान् – लेबनान् – सन्धिः

इरान्-देशस्य विदेशमन्त्री सैय्यद-अब्बास-अराघची इत्येषः अवदत् यत् पश्चिम-एशियादेशे शत्रुताम् निवारयितुं सप्ताहद्वयोः युद्धविराम-सन्धेः अन्तर्गतं लेबनान्-देशोपि अस्य अभिन्नः भागः अस्ति इति अमेरिका-देशः स्वस्य प्रतिबद्धतां अवश्यमेव पालयेदिति। इरानस्य शासकीय-वार्त्तावाहिन्यानुसारं

लेबनान्-देशे इरानस्य राजदूतेन सह दूरभाषया वार्तालापावधौ अराघची इत्यनेन इदमुक्तम्।

**वस्त्र-मन्त्रालयः**

वस्त्राणां कृते उत्पादनसम्बद्धप्रेरणा-योजनायाः तृतीय-प्रक्रमस्य अन्तर्गतं द्विपञ्चाशत् नूतनानि आवेदनपत्राणि सर्वकारेण अनुमोदितानि। वस्त्र-मन्त्रालयः अवदत् यत् एते आवेदकाः अष्टोत्तरसप्तशताधिक षट्सहस्रकोटि-रूप्यकाणां निवेशं कृतवन्तः, यस्य प्रत्याशितव्यापारः प्रायः एकविंशतिसहस्रकोटि-रूप्यकाणि अस्ति।

**ज्योतिबा फुले**

देशे अद्य ज्योतिबा फुलेवर्यस्य जयंती आमान्यते। समाज- सुधारकत्वेन ज्योतिबा फुलेवर्यः देशे अस्पृश्यतायाः अपाकरणाय अथ जाति प्रथायाः उन्मूलनाय कार्यं कृतवान्। सः स्वपत्न्यासावित्रीबाई इत्यनया सह सम्मिल्य देशे महिलासु शिक्षां प्रति रुचिं कल्पितवान्। श्री फुलेवर्यः अप्रैल मासस्य एकादश-दिनांके सप्तविंशत्युत्तर-अष्टादश-शततमे वर्षे जन्म लब्धवान्।

सत्य शोधक समाजस्य स्थापनाम् अपि विहितवान्, यस्य उद्देश्यं समानतायाः अधिकारप्रदानम् आसीत्। कन्याभ्रूणहत्यायाः विरोधे सः संघर्षं कृतवान् अथ जलसंकटस्य निराकरणाय एकं सशक्तम् अभियानं संचालितवान्। राष्ट्रपतिः, उपराष्ट्रपतिः प्रधानमंत्री, लोकसभा अध्यक्षः च संसदभवन-परिसरस्य प्रेरणा-स्थले ज्योतिबा-फुलेवर्यं श्रद्धांजलिम् समर्पयिष्यन्ति।

**ऋतु-विभागः**

भारत-ऋतु-विभागेन अद्य हिमाचलप्रदेशे, रायलसीमायां, तटीय-आन्ध्रप्रदेशे, केरलम्-प्रदेशे, माहे-प्रदेशे, दक्षिणान्तरिक-कर्णाटके च मेघावृष्टेः, विद्युत्-स्खलनस्य च पूर्वानुमानं प्रकटितम्। जम्मू-कश्मीरे, लद्दाखे, उपहिमालयी-पश्चिमवङ्गे, सिक्किमे, पूर्वोत्तरराज्ये च एतादृशाः स्थितयः भविष्यन्ति। ऋतुविभागेन अद्य आन्ध्रप्रदेशस्य तटीये प्रदेशे, कर्नाटकस्य तटीये प्रदेशे, केरलं राज्ये, माहे-प्रदेशे, कोङ्कणे, गोवायां, ओडिशायां, तमिलनाडु-राज्ये, पुदुचेरी-प्रदेशे, कारैकले च उष्ण-आर्द्र-ऋतोः पूर्वानुमानं प्रकटितम्।

-

**आई. पी. एल.**

आई. पी. एल. क्रिकेट्-क्रीडायां, गतरात्रौ गुवाहाटी-नगरस्य बरसापारा-क्रिकेट्-क्रीडाङ्गणे राजस्थान्-रायल्स्-दलेन रायल्-चैलेञ्जर्स्-बेङ्गलूरु-दलम् षट् स्तोभैः पराजितम्।

अद्यतनीयायां स्पर्धायां, पञ्जाब्-किङ्ग्स्, न्यू-चण्डीगढस्य मुल्लांपुरस्य महाराजा यादविन्द्रसिङ्घ्-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडाङ्गणे सायं सार्द्ध त्रिवादने सन् राईजर्स्-हैदराबाद्- दलं सम्मुखी करिष्यति। अन्यस्यां स्पर्धायां, चेन्नई नगरस्य एम्. ए. चिदम्बरम् क्रीडागृहे अद्य सायङ्काले सायं सार्द्ध सप्तवादने चेन्नई सूपर् किङ्ग्स् दलं दिल्ली कैपिटल्स् दलं सम्मुखी करिष्यति।

**।। इति वार्ताः।।**